National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2015; (2): 71-72
© 2015 NJHSR
www.sanskritarticle.com

**आचार्यः के गणपतिभट्टः**
अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः

**Correspondence:**
**आचार्यः के गणपतिभट्टः**
अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः

# "अग्निष्टोमसोमयागस्य औद्गात्रप्रयोगसमीक्षायाम् ऋत्विग्विचारः"

**आचार्यः के गणपतिभट्टः**

**भूमिका –**

**सामप्रियं सामगेयं सामवेदोल्लसन्मुखम्। वामदेवमहं वन्दे सामांश्च महीसुरान्॥**

वेदानां षट्सु अङ्गेषु शिक्षा व्याकरणं छन्दः निरुक्तं - ज्योतिषं कल्पः इत्याख्येषु षष्ठः अङ्गः कल्पः वर्तते। तस्मिन् कल्पे अनेके अग्निष्टोमप्रभृतयः एकदिनसुत्यात्मकाः एकाहनामकाः, द्विरात्रप्रभृति-द्वादशरात्रपर्यन्तम् अहीननामकाः यागाः, द्वादशरात्रप्रभृतिसत्रयागाः, एकसंवत्सरसाध्यगवामयनप्रभृति-सहस्रसंवत्सरसाद्यानि विश्वसृजामयनपर्यन्तम् अयनानि, वाजपेयव्रात्यस्तोम-अश्वमेधप्रभृतयः एतादृशाः यज्ञाः उपदिष्टाः वर्तन्ते। अस्मिन् कराले कलावपि अग्निष्टोमप्रभृति-अहीनात्मकद्वादशरात्रयाग-पर्यन्तं यज्ञान् अनुष्ठातुं धर्मशास्त्रेषु अनुमतिः दत्ता।

**"यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते। सन्यासं चाग्निहोत्रञ्च तावत् कुर्यात्कलौ युगे"॥**[1] इति।

**उपक्रमः –**

गौतमधर्मसूत्रे - चत्वारिंशत्-संस्कारेषु मध्ये सप्त पाकयज्ञाः, सप्त हविर्यज्ञाः, सप्त सोमसंस्थाः च अवश्यकर्तव्यतया उपदिश्यन्ते। तत्र सप्त सोमसंस्थाः एते अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, साङ्गवाजपेयः, अतिरात्रः, अप्तोर्यामः इति।

तत्र वाजपेययागस्य अङ्गभूतेषु एकः सौत्रमणी-नामकपशुबन्धः, बृहस्पतिसवाख्य एकः यज्ञश्च पठितः। तदपि मिलित्वा संस्थायाः एका संख्या अधिका भवेत्। तदर्थमेव (साङ्गवाजपेयः) इत्युक्तम्। वाजपेययागस्य अनुष्ठानेन बहु फलं लभ्यते। इतश्च बहवो नियमाः यजमानस्य प्रतिपादिताः॥

ब्राह्मणा राजानश्च पुरस्कुर्वीरन् स वाजपेयेन यजेत इति सूत्रकाराश्च वदन्ति। वाजपेययज्ञानुष्ठाने स्वर्गारोहणादिधर्माः वर्तन्ते। क्षत्रवृत्यादिभ्यः बहिः आगमनार्थं प्रत्यवरोहणीय-बृहस्पतिसवाख्ययागः आदिशत सूत्रकारः। पृथक्तया च पुरोधाकामार्थं बृहस्पतिसव-नामकयज्ञः अपाठीत्॥

एतादृशमहद्यज्ञानुष्ठानार्थं आत्मानं सज्जीकर्तुमेव अग्निष्टोमसोमयागः आदिष्टः। स च यागः आत्मानं दुष्टात् तरति, यतो हि कलौ दौर्बाह्मण्यमेव जन्यते।

तादृशदुष्टात् पावयितुं एतं यज्ञं अनुष्ठाय आत्मानं पावयित्वा कर्मणा चित्तस्य शुद्धिमवाप्य कैवल्यं प्राप्तुं एकः मार्गः महर्षिभिः उपदिष्टो वर्तते। अत एव सूत्रकाराः सर्वेऽपि सर्वप्रकृतिभूतम् अग्निष्टोमसोमयागं प्रथमं उपदिशन्ति।

यतः एतदग्निष्टोमसोमयागस्य अनुष्ठानमन्तरा अन्यान् सोमयागान् अनुष्ठातुं मार्गः नास्ति। अतश्च सर्वे यज्ञानुष्ठातारः सर्वप्रकृतिभूतम् * एतम् अग्निष्टोमसोमयागं प्रथमम् अनुतिष्ठन्ति। तस्मात् कारणात् मया सर्वप्रकृतिभूतम् अग्निष्टोमसोमयागमधिकृत्य यथासूत्रं प्रयोगः प्रदर्श्यते॥

तत्र चत्वारो गणाः सन्ति अध्वर्युगणः, ब्रह्मगणः, होतृगणः, उद्गातृगणः इति। ऋग्वेदात् होतृगणः, यजुर्वेदात् अध्वर्युगणः, सामवेदात् उद्गातृगणः, यजमानशाखायाः ब्रह्मगणः इति नियमः।

सामवेदगणे उद्गाता, प्रस्तोता, प्रतिहर्ता, सुब्रह्मण्यः इति नामकाः चत्वारः ऋत्विजः भवन्ति। अस्मिन् गणे चतुर्णामपि ऋत्विजां प्रयोगस्य विद्यमानेऽपि उद्गातुः प्रयोग एव प्रधानः भवति इत्यतः रूढ्या औद्गात्रप्रयोगः इति उच्यते।

उच्चस्वरेण गायन्तीति उद्गातारः। प्रातस्सवने मन्द्रस्वरेण, माध्यन्दिने मध्यमस्वरेण, तृतीयसवने तारस्वरेण गेयमिति नियमो वर्त्तते॥

**यजमानलक्षणम् –**

'याज्यश्च प्रथमैः त्रिभिः गुणैः व्याख्यातः प्रथमैः आर्षेयादिभिः त्रिभिः गुणैः युक्तः एव याज्यः स्यात्, नान्यः। तावन्मात्रमेव च तस्य अपेक्षितम्, न वाग्मित्वादिकमिति॥

**यागसङ्कल्पः –**

एकः यजमानः अग्निहोत्रादिकृतनित्यक्रियः, नोचेत्, सोमपूर्व-काधानं चेत् अग्याधान-पवमानेष्ट्यादीन् कृत्वा यागसंकल्पं करोति श्रीपरमेश्वर-प्रीत्यर्थं यज्ञेश्वरप्रीत्यर्थं सोमेन यक्ष्ये। ज्योतिष्टोमेन अग्निष्टोमेन रथन्तरसाम्ना द्वादशशतदक्षिणेन, तेन परमेश्वरं प्रीणयानि, इति। एवं पत्न्या अपि॥

**ऋत्विग्लक्षणम् –**

ऋत्विगार्षेयोऽनूचानस्साधुचरणो वाग्म्यन्यूनाङ्गोऽनतिरिक्ताङ्गो द्वयसत-श्चानतिकृष्णो ऽनतिश्वेतः ऋषिः बहुश्रुतः। "एष वै ब्राह्मण ऋषिरार्षेयो यः शुश्रुवान्"[2] इति, तैत्तिरीयकब्राह्मणम्। तेन ऋषेः बहुश्रुतस्य अपत्यम् आर्षेयः। अनूचानः कल्पसूत्राध्यायी इति बोधायनः। साधुचरणः साधुवृत्तः। वाग्मी प्रशस्तवाक्। अन्यूनाङ्गः – चतुरङ्गुलादि-प्रतिषेधः। द्वयसतश्चेति, द्वयसं परिमाणम्। प्रमाणे द्वयसज् इति पाणिनिस्मृतेः। द्वयसत इति पञ्चम्याः तसिल्प्रत्ययः। तेन अयमर्थः। पुरुषलक्षणं शास्त्रसिद्धं यदङ्गप्रत्यङ्गपरिमाणं ततोऽपि अन्यूनाङ्गः अनतिरिक्ताङ्ग इति॥

ननु च प्रत्ययः परश्चेति पाणिनिस्मृतेः, केवलस्यद्वयसज्प्रत्ययस्य प्रयोगः नोपपद्यते। नैवं, परश्चेति सूत्रमधिकृत्य महावार्तिककारेण उक्तं द्वयसजादीनां केवलप्रयोगस्य दृष्टत्वात्, तद्वत्, अन्येषामपि प्रत्ययानां केवलप्रत्ययप्रयोगप्रसङ्गे प्रयोगनियमार्थ परश्चेति सूत्रम् इति। तेन द्वयसजातीनां केवलप्रयोगः कण्ठेनैव शब्दविद्भिः साधुत्वेनोक्तः, इति न कश्चिद्दोषः॥

केचित्तु अद्वयसत इति नञ् प्रश्लेषेण पदच्छेदं कृत्वा, षण्ढनिषेधोऽयमित्याहुः। तदयुक्तं - द्वयसत इति षण्ढे प्रयोगाभावात्, अन्यूनाङ्गः इत्यनेनैव षण्ढनिवृत्तिसिद्धेः। चकारोऽपि तत्पक्षे निरर्थकः॥ षड्विंशब्राह्मणे तृतीयाध्याये प्रथमखण्डे आर्विज्येषु ऋत्विजां यजमानस्य च विज्ञेयं प्रतिपादितम्।

अथार्विज्येषु ऋत्विजा यजमानस्य च विज्ञेयं प्रतिपाद्यते, तत्र प्रथमं होतुर्विज्ञेयम् यद्धोता जहाति वाग्घ तद्यजमानं जहाति। स यत्तत्करोति स्वां वाचं यजमाने दधाति। स विष्वङ् वाचामुष्मिंल्लोके संभवति॥

आर्विज्ये होता यत् कर्म अविज्ञाय जहाति तत् तेन कर्मत्यागेन वाग्घ वागेव यजमानं जहाति। वाङ्गे होतेति प्रागभिधानात्। तत् तस्मात् सः होता यत् कर्म विज्ञाय मया एतावदनुष्ठेयमिति करोति तदा स्वां यजमानसंबन्धिवाचं यजमाने दधाति निदधाति। किञ्च, होता स्वयमपि इह लोके वाचा विष्वङ् सर्वव्यापी सर्वव्यवहारसमर्थः। सन् अमुष्मिन् परलोके संभवति स्वाभीष्ट फलं प्राप्तुं समर्थो भवति। अतो होना स्वकर्म सम्यग्विज्ञेयमित्यर्थः॥

अथ अध्वर्युविज्ञेयं दर्शयति "यदाध्वर्युर्जहाति चक्षुर्ह तद्यजमानं जहाति। स यत्तत् करोति स्वं चक्षुर्यजमाने दधाति। स विष्वङ् चक्षुषामुष्मिँल्लोके संभवति"॥ अध्वर्युः यत् स्वीयं कर्म अज्ञानात् जहाति तत् तेन चक्षुरेव यजमानं जहाति। चक्षुर्मेऽध्वर्युः इत्युक्तत्वात्। किञ्च स्वयमपि चक्षुषा इह लोके विष्वङ् सर्वं जानन्। समानमन्यत्। अतोऽध्वर्युणा स्वकर्म सम्यग्विज्ञेयमित्यभिप्रायः॥

ब्रह्मविज्ञेयं दर्शयति - उयद् ब्रह्मा जहाति मनो ह तद्यजमानं जहाति। स यत्तत् करोति स्वं मनो यजमाने दधाति। स विष्वङ् मनसामुष्मिंल्लोके संभवति॥

ब्रह्मा यत् स्वकीयं कर्म जहाति तत् तेन मन एव यजमानं त्यजति। 'मनो मे ब्रह्मा इत्युक्तत्वात्। मनसा विष्वङ् स्वमनसि स्थितं सर्वमभीष्टं प्राप्नुवन्। शिष्टंट पूर्ववत्॥

उद्गातृविज्ञेयं दर्शयति - यदुद्गाता जहाति श्रोतं ह तद्यजमानं जहाति। स यत्तत् करोति स्वं श्रोत्रं यजमाने दधाति। स विष्वङ् श्रोत्रेणामुष्मिंल्लोके संभवति॥

यदि स्वीयं कर्म उद्गाता जहाति तर्हि श्रोत्रमेव यजमानं जहाति। 'श्रोत्रं म उद्गाता इत्युदितत्वात्। अतः स्वं कर्म जानन् करोति चेत् यजमाने स्वं श्रोत्रं निदधाति। स्वयमपि श्रोत्रेण विष्वङ् सर्वं श्रोतव्यं सर्वतो जानन् परलोके स्वाभीष्ट फलं लभते इति। अतः स्वीयं कर्म सम्यग्जानीयादित्यर्थः॥

इत्येवं रूपेण अस्मिन् शोधपत्रे सामान्यतः अग्निष्टोमसोमयागस्य औद्गात्रप्रयोगसमीक्षा इतिनाम्नः आधारेण ऋत्विग्विचारः सम्पादितः। एतदाधारेण अन्येऽपि विषयाः अग्रिमेषु पत्रेषु एतस्मिन् क्रमे निरूपयिष्यन्ते।

**सन्दर्भग्रन्थ :-**

1 धर्मशास्त्रेषु कलिवर्ज्यप्रकरणे पठितमस्ति।

2 तैत्तिरीय संहिता-2 काण्डे-5 प्रश्नाः 4 अनुवाकः